# राष्ट्रियशिक्षानीतिः संस्कृतं च

(राष्ट्रियशिक्षानीतौ (NEP-2020) संस्कृतस्य भूमिकाम् अधिकृत्य शिक्षाक्षेत्रे वैश्विकस्तरे च संस्कृतस्य प्रभावम् आश्रित्य च कुलपतीनाम् अभिप्रायाः आकाशवाण्यां (नमस्कार भोपाल) संवादकार्यक्रमरूपेण हिन्द्यां प्रसारितः वर्तते ।)

भारते केन्द्रसर्वकारेण राज्यसर्वकारैः च राष्ट्रियशिक्षानीतेः (NEP-2020) क्रियान्वयनं द्रुतगत्या कृतं वर्तते। राष्ट्रियशिक्षानीतेः विचारः नाम भारतकेन्द्रितशिक्षायाः विचारः अर्थात् संस्कृतस्य विचारः एव। शिक्षानीतेः प्रतिवेदनेऽपि संस्कृतमूलभारतीयविद्यानां सर्वस्तरेषु क्रियान्वयनाय समित्या संसूचनाः प्रदत्ताः सन्ति।

**संस्कृतं केवलं भाषामात्रं नास्ति।** संस्कृतिरूपेण शास्त्ररूपेण कलारूपेण मनोविज्ञानरूपेण प्रशासनरूपेण इत्येवं विविधरूपैः भारतीयविद्यासु संस्कृतभाषा लीना संक्रान्ता च वर्तते।

संस्कृतमूलभारतीयविद्याः अन्ताराष्ट्रियस्तरेऽपि अद्यत्वे परिचिताः सन्ति। यथा-योगः, आयुर्वेदः, प्रशासनम्, अर्थशास्त्रम्, समाजशास्त्रम् इत्येवं विभिन्नशास्त्रणां विद्यानां च मूलभूषा भाषा इत्युक्ते संस्कृतभाषा एव।

संस्कृतम् अद्य इतिहासेन सम्बद्धम् इति न कोऽपि वदति। यतोऽहि संस्कृतं भविष्यसम्बद्धं वर्तते इति युवयुवतयः सुष्ठु जानन्ति। **युवाकाङ्क्षाणां सम्पूर्तौ सक्षमा भाषा नाम संस्कृतभाषा** इति युवानः अधुना अवगच्छन्तः सन्ति। **संस्कृतेन विना एकं भारतम् इति परिकल्पना न आयाति** च। अतः संस्कृतस्य संस्कृतमूलभारतीयविद्यानां निधिः राष्ट्रियशिक्षानीतौ विद्यते इति स्पष्टम्। शिक्षानीतेः वास्तविकः सारः अस्माभिः अवगन्तव्यः इति मम आशयः।

**जयतु संस्कृतं जयतु भारतम्।**

**आचार्य श्रीनिवासः वरखेड़ी**
**कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**

(अनेन संवादसारेण सह कुलपतीनां संवादस्य श्रव्यकणिका (audio clip) अपि संलग्ना अस्ति। सर्वे छात्रः अवश्यमेव शृणुयुः। परिसरीयेषु समूहेषु (WhatsApp Group) अस्य प्रसारः अवश्यं करणीयः।)